## श्रीसुरसरस्वतीसभा, शृङ्गेरी

## तृतीया परीक्षा – प्रथमपत्रिका - नूतनपठ्याधारिता

**दिनाङ्कः** – 01-09-2024 **अङ्काः** – १००

**पूर्वाह्णः** – १०:०० तः १:०० पर्यन्तम् **समयः** – होरात्रयम्

छात्रेभ्यः सूचनाः – १. संस्कृतभाषया उत्तरणीयानि उत्तराणि देवनागरीलिप्या एव लेखनीयानि।

२. प्रश्नक्रमाङ्कान् यथा**योग्यं** लिखत।

1. **पञ्चानां संस्कृतेन एकवाक्येन उत्तरं लिखत ।** 5

१. दमयन्ती कासां रत्नम् ?

२. भोजं कः रक्षितवान् ?

३. जगदालम्बं किम् ?

४. केषां वंशः सूर्यप्रभवः ?

५. योगशास्त्रं केन प्रणीतम् ?

६. श्रीमच्छङ्करभगवत्पादाः कुत्र अवतेरुः ?

2. **षण्णां द्वित्रैः वाक्यैः उत्तरं संस्कृतेन लिखत ।** 12

१. श्रीशङ्कराचार्यैः कुत्र कुत्र मठाः स्थापिताः ?

२. सुवर्णकृषेः परिपाटी का ?

३. योगी केभ्यः अधिकः ?

४. कविः आत्मानं केन केन च सह उपमीयते ?

५. अन्ते वरुणदेवः किमकरोत् ?

६. के गुणाः पुरुषं दीपयन्ति ?

७. हंसः दमयन्तीं किमब्रवीत् ?

3. **त्रयाणां पञ्चषैः वाक्यैः संस्कृतेन उत्तरं लिखत ।** 9

१. भोजस्य राज्यप्राप्तिः ।

२. विष्णौ प्रह्लादस्य भक्तिः।

३. पतञ्जलिप्रणीतं योगशास्त्रम्।

४. वानरः हन्यमानात् मकरात् आत्मानं कथं ररक्ष ?

4. **चतुर्णां संस्कृतेन अष्टभिः वाक्यैः लघुटिप्पणीं लिखत।** 16

१. काष्ठच्छिदः सत्यशीलता।

२. कालिदासः

३. मुञ्जः

४. आयुर्वेदशास्त्रम्

५. नलः

६. हिरण्यकशिपुः

5. **चतुर्णां ससन्दर्भं** संस्कृत**भाषया विवृणुत ।** 12

१. " सर्पदष्टं विषव्याकुलं शस्त्रविच्छिन्नं वा मनुजं क्षणादेव पुनर्जीवितं कुर्मः ।"

२. " विशिष्टाया विशिष्टेन सङ्गमो गुणवान् भवेत् ।"

३. " तत्र देवः प्रसीदति ।"

४. " वयं राजोपजीविनः कथमस्तेयिनो भवामः ?"

५. " अहं त्वां तमेव जम्बूपादपं प्रापयामि ?"

6. **द्वयोः अन्वयानुसारम् अर्थं मातृभाषया** आङ्ग्लभाषया वा **लिखत ।** 4

१. अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥

२. दमयन्त्याः सकाशे त्वां कथयिष्यामि नैषध ।
यथा त्वदन्यं पुरुषं न सा मंस्यति कर्हिचित् ॥

३. यः प्रीणयेत् सुचरितैः पितरं स पुत्रो यद्भर्तुरेव हितमिच्छति तत्कलत्रम्।
तन्मित्रमापदि सुखे च समक्रियं यदेतत्त्रयं जगति पुण्यकृतो लभन्ते ॥

7. **श्लोकद्वयं पूरयत ।** 4

१. कस्तूरीतिलकं -------------- चूडामणिः॥ २. वने रणे -------------------- पुराकृतानि॥

३. विद्या नाम --------------- पशुः ॥

8. **अस्य गद्यभागस्य अनुवादं** मातृभाषया आङ्ग्लभाषया वा **कुरुत।** 3

ततो भृशं क्रुद्धो हिरण्यकशिपुः तक्षकादीन् महासर्पान् प्रह्लादं दष्टुम् आदिशत्। तदा दशतां सर्पाणां दंष्ट्राः विशीर्णाः। ततो दानवपतिः पुत्रं हन्तुं दिग्गजानाकारयामास। तदा बालस्तु विष्णुं स्मरन् स्वस्थ एव स्थितः। परम् तु कुलिशनिष्ठुराः तेषां दिग्गजानां दन्ताः भग्नाः। अथ प्रह्लादः दैत्यैः अग्नौ क्षिप्तः, अपि तु मनागपि दाहं न लेभे।

9. **त्रयाणां पर्यायपदानि लिखत ।** 3

१. प्रत्यूहः २. वीक्ष्य ३. विधाता ४. पाटवम्

10. **त्रयाणां विरुद्धपदानि लिखत ।** 3

१. कृतघ्नः २. मृदु ३. स्मृतः ४. व्याधिः

11. **त्रीणि पदानि संस्कृतवाक्येषु योजयत ।** 3

१. श्रोतुम् २. सद्यः ३. उदर्कम् ४. पुरतः

12. **त्रयाणां सन्धिं विभज्य सन्धिनाम लिखत ।** 3

१. अन्तर्गृहम् २. नक्राद्विमुक्तिम् ३. यल्लभसे ४. एतन्निशम्य

13. **वाक्यदोषं परिहरत । (त्रयाणाम् एव)** 3

१. भवती भिक्षां देहि । २. गृहस्य परितः भित्तिः अस्ति ।

३. श्रीरामः वसिष्ठेन वेदमधीतवान् । ४. प्रह्लादं दैत्यराजा आहूतवान् ।

**14. व्याकरणरीत्या विशदयत / प्रकृति-प्रत्यय-विभागं दर्शयत। (त्रीण्येव)** 3

१. चोरयन्तः २. प्रादुर्भूय ३. चिन्तितम् ४. गतः

**15. लोकोक्तिं पूरयित्वा मातृभाषया विवृणुत। (द्वयोः)** 4

१. विभूषणं ----------------------- । ३. गुणाः पूजास्थानं ------------------------।

२. सन्निमित्ते --------------------------- ।

**16. यथायोग्यं विभक्तिरूपेण रिक्तस्थानं पूरयत।** 4

१. मया ---------------- दातुं तातपादानां धनं चोरितम्। (सेवक)

२. किं हृदयं ---------- पृथक् तिष्ठति ? (शरीर)

३. रामः ---------- स्पृहयति। (आम्रफल)

४. प्रह्लादः ----------- अक्षताङ्गः एव निःसृतवान्। (अग्नि)

**17. व्याकरणविशेषं लिखत ।** (द्वावेव) 2

१. अधिपतिः २. शालां प्रति ३. रामेण सह

**18. रेखाङ्कितपदमधिकृत्य प्रश्नवाक्यं कुरुत।** 2

१. मकरः वानरं <u>नदीमध्यगतं स्वगृहं</u> नेतुम् इच्छति ।

२. वरुणदेवः <u>जलात्</u> काष्ठम् आनीतवान् ।

**19. एतेषां विग्रहवाक्यं कृत्वा समासनाम लिखत। (त्रयाणामेव)** 3

१. नृवराय २. पितरौ ३. प्रतिष्ठार्थम् ४. असत्यम्

**20. प्रयोगपरिवर्तनं कुरुत।** 2

१. योगिना भोजो जीवितः । २. त्वं मया पृच्छ्यसे ।

-------------